**EB/E**

# टिळक महाराष्ट्र विद्यापीठ, पुणे

## संस्कृत पारंगत (एम्. ए.) बहिःस्थ

## परीक्षाः जून –२०२२

## सत्र १ले

**विषयः सामान्य व्याकरण/ व्याकरण, भाषांतर, निबंध** (EB -3104/19E3104)

**दिनांकः** २८/०६/२०२२ **गुण :** ८० **वेळ :** दु. २.०० ते ५.००

**सूचनाः** १) उजवीकडील अंक त्या प्रश्नाचे गुण दर्शवितात. २) सर्व प्रश्न सोडवणे अनिवार्य.

**प्र.१ अ) एकं विषयमधिकृत्य निबन्धो लेख्यः।** (१५)

१. धन्यो गृहस्थाश्रमः
२. मम प्रिया भारतीया भाषा
३. चलभाषस्य महत्त्वम्

**प्र. २ अ) महाराष्ट्रभाषायानुवदत। (किमप्येकम्)** (१०)

१. अस्माकं विद्यालयः समया नगरमेकस्मिन् सुरम्ये स्थले स्थितोऽस्ति। विद्यालयस्याकर्षकणि अभ्रंकषाणि भवनानि बलाद् हरन्ति दर्शकानां चेतांसि। अस्माकं विद्यालयः रम्योद्यानमध्ये वर्तते, यस्य तुङ्गे मुखद्वारे दोधूयमाना पताका दूरादेव दृश्यते। अस्माकं विद्यालयेऽध्यापकानां सङ्ख्या षष्टिः, छात्राणां सङ्ख्या पञ्चाशदधिंक सहस्रं वर्तते।

२. दरिद्रः – दिवङ्गतस्य शिवस्य अलङ्काराः–चन्द्रः, गङ्गा, सर्पराजः, वासुकिः, आकाशेन नीताः।
राजा : – ततः परम्
दरिद्रः – ततः परमासन् तस्य गुणाः। तान् अन्ये विभज्य अनयन्
राजा : – के
दरिद्रः – दानशीलताम् उदारतां वीरतां च भवान् अनयत्। अन्ते अवशिष्टः एकः एव गुणः तमेव गृहीत्वा अहं भूलोके भ्रमामि। भिक्षा न करोमि सदा।

**आ) माध्यमभाषयानुवदत। (द्वौ श्लोकौ)** (१२)

१. सारङ्गाः सुहृदो गृहं गिरिगुहा शान्तिः प्रिया गेहिनी वृत्तिर्वन्यलताफलैर्निवसनं श्रेष्ठं तरूणां त्वचः।
तद्ध्यानामृतपूतमग्नमनसां येषामियं निर्वृतिस्तेषामिन्दुकलावतंसयमिनां मोक्षेऽपि नो न स्पृहा।।

२. विपदि धैर्यमथाभ्युदये क्षमा सदसि वाक्पटुता युधि विक्रमः।
यशसि चाभिरुचिर्व्यसनं श्रुतौ प्रकृतिसिद्धमिदं हि महात्मनाम्।।

३. जनयति हृदि खेदं मङ्गलं न प्रसूते परिहरति यशांसि ग्लानिमाविष्करोति।
उपकृतिरहितानां सर्वभोगच्युतानां कृपणकरगतानां सम्पदां दुर्विपाकः।।

**प्र. ३ अ) दशरूपाणां परिचयं कारयत।** (१०)

| | | | |
|---|---|---|---|
| १. शशिने | २. कानि | ३. निर्गच्छन्तु | ४. अमलीकरोति |
| ५. प्रत्यब्रवीथाः | ६. युष्मत् | ७. असौ | ८. जानते |
| ९. चत्वारि | १०. जगाद | ११. भुवि | १२. ददीरन् |

**आ) सनामनिर्देशं पञ्च समासान् विघयत।** (१०)

| | | | |
|---|---|---|---|
| १. निद्राभङ्ग | २. महापुरुषाणाम् | ३. दुर्जनाः | ४. पुष्पपत्रे |
| ५. जलदाः | ६. गुणविहीनाः | ७. प्रत्यहम् | |

**इ) पञ्च सन्धीन् घटयत विघटयत वा।** (०५)

| | | |
|---|---|---|
| १. वृषभावपि | २. पुनः+ नश्यति | ३. वागेव |
| ४. सः + आगच्छतुं | ५. संस्कृती राजते | ६. गच्छति + अधः |

**प्र. ४ अ) अन्वयं लिखत।** **(०४)**

यथा काष्ठं च काष्ठं च समेयातां महोदधौ।
समेत्य च व्यपेयतां तद्वद्भूतसमागमः।।

**ब) सूचनानुसारं दश वाक्यानि पुनर्लिखत।** **(१०)**

१. तस्मै नमः ........... । ( कर्मन् इति शब्दस्य योग्यां विभक्तिं योजयत।)
२. मर्कटाः फलानि खादित्वा वृक्षात् वृक्षं कूर्दन्ति (पूर्वकालवाचक निष्कासयत।)
३. छात्राः क्रीडनाय स्पृहयन्ति। (रुच् धातोः उपयोगं कुरुत।)
४. कमलं पुष्पेषु सुन्दरम्। (सर्वेषां पदानां समानार्थकानि योज्यानि।)
५. सर्वे सुन्दराणि गीतानि गायन्ति। (प्रयोगं परिवर्तयत।)
६. अहं तदा आत्मानं सृजामि। (बहुवचने लिखत।)
७. तत्र एकः खगः उड्डयते स्म। (स्म अव्ययं निष्कासयत।)
८. रामः रावणं जघान। (लङ्लकारे लिखत।)
९. सः मम प्रीतिपात्रः। (अशुद्धिसंशोधनं कुरुत।)
१०. रमेशः दुग्धं पीत्वा शालां गच्छति। (अहं कर्तृपदं योज्यम्।)
११. सर्वे गुणानि काञ्चनमाश्रयन्ति। ( अशुद्धिसंशोधनं कुरुत।)
१२. त्वं मन्दं वद। (भवान् कर्तुपदं योजयत।)

**क) वाक्येषूपयोगं कुरुत। (केवलं चत्वारि)** **(०४)**

उभयतः विना गम्-गच्छ् कृते बहिः स्वस्ति

--------------